# भूसूक्तम्

## Bhūsūktam

भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।

bhūmirbhūmnā dyaurvariṇā'ntarikṣaṁ mahitvā ।

उपस्थे ते देव्यदितेऽग्निमन्नाद मन्नद्यायादधे।

upasthe te devyadite'gnimannāda mannadyāyādadhe ।

आऽयङ्गौः पृश्निरक्रमी दसनन्मातरं पुनः ।

ā'yaṅgauḥ pṛśnirakramī dasananmātaraṁ punaḥ ।

पितरं च प्रयन्त्सुवः ।

pitaraṁ ca prayantsuvaḥ ।

त्रिगूंशद्धाम विराजति वाक्पतङ्गाय शिश्रिये ।

trigṁśaddhāma virājati vākpataṅgāya śiśriye ।

प्रत्यस्य वह द्युभिः ।

pratyasya vaha dyubhiḥ ।

अस्य प्राणादपानत्यन्तश्चरति रोचना ।

asya prāṇādapānatyantaścacarati rocanā ।

व्यख्यन् महिषः सुवः ।।

radiosai

vyakhyan mahiṣaḥ suvaḥ|

यत्त्वा क्रुद्धः परोवपमन्युना  यदवर्त्या ।

yattvā kruddhaḥ parovapamanyunā  yadavartyā |

सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि।

sukalpamagne tattava punastvoddīpayāmasi|

यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे ।

yatte manyuparoptasya pṛthivīmanudadhvase |

आदित्या विश्वे तद्देवा वसवश्च समाभरन् ।

ādityā viśve taddevā vasavaśca samābharan |

मनोज्योतिर्जुषतामाज्यम् विच्छिन्नं यज्ञगं समिमं दधातु ।

manojyotirjuṣatāmājyam vicchinnaṁ yajñagṁ samimaṁ dadhātu |

ब्रृहस्पतिर्तनुतामिमंनो विश्वे देवा इहमादयन्ताम् ।

brṛhaspatirtanutāmimaṁno  viśve devā ihamādayantām |

मेदिनी देवी वसुन्धरा स्याद्वसुधा देवी वासवी ।

medinī devī vasundharā syādvasudhā devī vāsavī|

ब्रह्मवर्चसः पितृणाग् श्रोत्रं चक्षुर्मनः ।

brahmavarcasaḥ pitṛṇāg śrotraṁ cakṣurmanaḥ|

देवी हिरण्यगर्भिणी देवी प्रसूवरी ।

devī hiraṇyagarbhiṇī devī prasūvarī|

सदने सत्यायने सीद ।

sadane satyāyane sīda|

समुद्रवती सावित्रीह नो देवी मह्यङ्गी ।

samudravatī sāvitrīha no devī mahyaṅgī|

महीधरणी महोव्यथिष्ठा-श्शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषिणी ।

mahīdharaṇī mahovyathiṣṭhā-śśṛṅge śṛṅge yajñe yajñe vibhīṣiṇī|

इन्द्रपत्नी व्यापिनी सुरसरिदिह ।

indrapatnī vyāpinī surasaridiha|

वायुमती जलशयनी श्रियंधाराजा सत्यन्धोपरिमेदिनी ।

vāyumatī jalaśayanī śriyandhārājā satyandhoparimedinī|

श्वोपरिधत्तं परिगाय ।

śvoparidhattaṁ parigāya|

विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् ।

viṣṇupatnīṁ mahīṁ devīṁ mādhavīṁ mādhavapriyām|

radiosai

लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ।

lakṣmī priyasakhīṁ devīṁ namāmyacyutavallabhām।

धनुर्धरायै विद्महे सर्वसिद्धयै च धीमहि । तन्नो धरा प्रचोदयात् ।

dhanurdharāyai vidmahe sarvasiddhayai ca dhīmahi । tanno dharā pracoodayāt ।

महीं देवीं विष्णुपत्नी-मजूर्याम् ।

mahīṁ devīṁ viṣṇupatnī-majūryām।

प्रतीची मेनागं हविषा यजामः ।

pratīcī menāgṁ haviṣā yajāmaḥ।

त्रेधा विष्णुरुरुगायो विचक्रमे ।

tredhā viṣṇururugāyo vicakrame।

महीं दिवं पृथिवीमन्तरिक्षम् ।

mahīṁ divaṁ pṛthivīmantarikṣam।

तच्छ्रोणैतिश्रव-इच्छमाना ।

tacchroṇaitiśrava-icchamānā।

पुण्यग्ग् श्लोकं यजामनाय कृण्वती ॥

puṇyagg ślokaṁ yajāmanāya kṛṇvatī ||

radiosai

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

|| om śāntiḥ śāntiḥ śāntiḥ ||